CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशंनमः॥ ॥श्रीशुकउवाच॥एवंव्यवसितोबुद्ध्यासमाधायम
नोहृदि॥जजापपरमंजाप्यंप्राग्जन्मन्यनुशिक्षितम्॥ १ ॥गजेन्द्र
उवाच॥ॐनमोभगवतेतस्मैयतएतच्चिदात्मकम्॥पुरुषायादि
बीजायपरेशायाभिधीमहि॥ २॥यस्मिन्निदंयतश्चेदंयेनेदंयइ
दंस्वयम्॥योस्मात्परस्माच्चपरस्तंप्रपद्येस्वयंभुवम्॥ ३ ॥
यःस्वात्मनीदंनिजमाययार्पितंक्वचिद्विभातंक्वचतत्तिरोहित
म्॥अविद्धदृक्साक्ष्युभयंतदीक्षतेसआत्ममूलोवतुमांपरात्प

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गजें रः॥४॥कालेनपञ्चत्वमितेषुकृत्स्नशोलोकेषुपालेषुचसर्वहेतु
१ षुतमस्तदासीद्गहनंगभीरंयस्तस्यपारेभिविराजतेविभुः॥५॥
नयस्यदेवाऋषयःपदंविदुर्जन्तुःपुनःकोर्हतिगंतुमीरितुम्।य
थानटस्याकृतिभिर्विचेष्टतोदुरत्ययानुक्रमणःसमावतु॥६॥
दिदृक्षवोयस्यपदंसुमङ्गलंविमुक्तसङ्गामुनयःसुसाधवः॥च
रन्त्यलोकव्रतमव्रणंवनेभूतात्मभूताःसुहृदःसमेगतिः॥७॥ राम
नविद्यतेयस्यचजन्मकर्मवाननामरूपेगुणदोषएववा।तथा १

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पिलोकाप्ययसंभवाययःस्वमाययातान्यनुकालमृच्छति॥८॥
तस्मैनमःपरेशायब्रह्मणेऽनन्तशक्तये।अरूपायोरुरूपायन
मआश्चर्यकर्मणे॥९॥नमआत्मप्रदीपायसाक्षिणेपरमात्म
ने।नमोगिरांविदूरायमनसश्चेतसामपि॥१०॥सत्वेनप्रति
लभ्यायनैष्कर्म्येणविपश्चिता।नमःकैवल्यनाथायनिर्वाणसु
खसंविदे॥११॥नमःशान्तायघोरायमूढायगुणधर्मिणे।नि
र्विशेषायसाम्यायनमोज्ञानघनायच।१२।क्षेत्रज्ञायनमस्तु

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गजें भ्यंसर्वाध्यक्षायसाक्षिणे॥पुरुषायात्ममूलायमूलप्रकृतयेनम
२ :१३ सर्वेन्द्रियगुणद्रष्ट्रेसर्वप्रत्ययहेतवे असताच्छायायो
क्तायसदाभासायतेनमः १४ नमोनमस्तेखिलकारणायनि
ष्कारणायाद्भुतकारणाय सर्वागमाम्नायमहार्णवायनमो
पवर्गायपरायणाय १५ गुणारणिछन्नचिदूष्मपायतत्क्षो
भविस्फूर्जितमानसाय नैष्कर्म्यभावेनविवर्जितागमःस्वयं राम
प्रकाशायनमस्करोमि॥१६॥मादृक्प्रपन्नपशुपाशविमोक्ष २

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गायमुक्तायभूरिकरुणायनमोलयाय स्वांशेनसर्वतनुभृन्मन
सिप्रतीतप्रत्यग्दृशेभगवतेबृहतेनमस्ते ७ आत्मात्मजाप्त
गृहवित्तजनेषुसक्तैर्दुष्प्रापणायगुणसङ्गविवर्जिताय मुक्ता
त्मभिःस्वहृदयेपरिभाविताय ज्ञानात्मनेभगवतेनमईश्वरा
य १८ यंधर्मकामार्थविमुक्तिकामाभजन्तइष्टांगतिमाप्नु
वन्ति किंत्वाशिषोरात्यपिदेहमव्ययंकरोतुमेदभ्रदयोविमो
क्षणाम् १९ एकान्तिनोयस्यनकञ्चनार्थंवाञ्छन्तियेवैभगव

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गजे प्रपन्नाः अत्यद्भुतंतच्चरितंसुमङ्गलंगायन्तआनन्दसमुद्रमग्नाः।
३ २० तमक्षरंब्रह्मपरंपरेशमव्यक्तमाध्यात्मिकयोगगम्यम् अ
तीन्द्रियंसूक्ष्ममिवातिदूरमनन्तमाद्यंपरिपूर्णमीडे २१ य
स्यब्रह्मादयोदेवावेदालोकाश्चराचराः नामरूपविभेदेनफ
ल्ग्व्याचकलयाकृताः २२ यथार्चिषोग्नेःसवितुर्गभस्तयो
निर्यान्तिसंयान्त्यसकृत्स्वरोचिषः तथायतोयंगुणसंप्रवा राम
होबुद्धिर्मनःखानिशरीरसर्गाः २३ सवैनदेवासुरमर्त्यति ३

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

र्यङ्नस्त्रीनषण्ढोनपुमान्नजन्तुःनायङ्गुणःकर्मनसन्नचासन्निषेध
शेषोजयतादशेषः २४ जिजीविषेनाहमिहामुयाकिमन्तर्बहि
श्चावृतयेभयोन्या इच्छामिकालेननयस्यविप्लवस्तस्यात्मलो
कावरणस्यमोक्षम् २५ सोहंविश्वसृजंविश्वमविश्वंविश्ववेद
सम् विश्वात्मानमजंब्रह्मप्रणतोस्मिपरंपदम् २६ योगरंधि
तकर्माणोहृदियोगविभाविते योगिनोयंप्रपश्यन्तियोगेशं
तन्नतोस्म्यहम् २७ नमोनमस्तुभ्यमसह्यवेगशक्तित्रयायार

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गजे॰ खिलधीगुणाय प्रपन्नपालाय दुरन्तशक्तये कदिन्द्रियाणामनवाप्य
४ वर्त्मने २८ नायं वेद स्वमात्मानं यच्छक्त्याहंधिया हतम् तं दुरत्य
यमाहात्म्यं भगवंतमितोस्म्यहम् २९ श्रीशुक उवाच एवं
गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाभि
मानाः नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामरम
यो हरिराविरासीत् ३० तं तद्वदार्त्तमुपलभ्य जगन्निवासः स्तो राम॰
त्रं निशम्य दिविजैः सह संस्तुवद्भिः छन्दोमयेन गरुडेन समुह्य ४

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मानश्चक्रायुधोभ्यगमदाशुयतोगजेन्द्रः ३१ सोन्तःसरस्युरुबले
नगृहीतमार्त्तोदृष्ट्वागरुत्मतिहरिंखउपात्तचक्रम् उत्क्षिप्यसा
म्बुजकरांगिरमाहकृछ्रान्नारायणाखिलगुरोभगवन्नमस्ते ३२
तंवीक्ष्यपीडितमजःसहसावतीर्यसग्राहमाशुसरसःकृपयो
ज्जहार ग्राहाद्विपाटितमुखादृरिणागजेंद्रंसंपश्यतांहरि
रमूमुचदुस्त्रियाणाम् ३३ इतिगजेन्द्रमोक्षणोत्तनीयः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मल्लानामशनिर्नृणां नरवरस्त्रीणां स्मरो मूर्त्तिमान् गोपानां स्वजनोऽस
तां क्षितिभुजां शास्ता स्वपित्रोः शिशुः। मृत्युर्भोजपतेर्विराडविदुषां त
त्त्वं परं योगिनां वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः हरिः

त



Kashi Maharani Collection, Ramnagar Fort, Varanasi